# shivAShTakam by Adi ShankarAcharya

# श्रीशिवाष्टकम्

## Document Information

Text title : shivAShTakam 3

File name : shivAShTakam3.itx

Category : aShTaka, shiva, shankarAchArya

Location : doc_shiva

Author : Adi Shankaracharya

Transliterated by : DPD

Proofread by : DPD

Latest update : January 23, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# श्रीशिवाष्टकम्

तस्मै नमः परमकारणकारणाय
दीप्तोज्ज्वलज्ज्वलितपिङ्गललोचनाय ।
नागेन्द्रहारकृतकुण्डलभूषणाय
ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥ १॥

श्रीमत्प्रसन्नशशिपन्नगभूषणाय
शैलेन्द्रजा वदन चुम्बितलोचनाय ।
कैलासमन्दिरमहेन्द्रनिकेतनाय
लोकत्रयार्तिहरणाय नमः शिवाय ॥ २॥

पद्मावदातमणिकुण्डलगोवृषाय
कृष्णागरुप्रचुरचन्दनचर्चिताय ।
भस्मानुषक्तविकचोत्पलमल्लिकाय
नीलाब्जकण्ठसदृशाय नमः शिवाय ॥ ३॥

लम्बत्सपिङ्गल जटामुकुटोत्कटाय
दंष्ट्राकरालविकटोत्कटभैरवाय ।
व्याघ्राजिनाम्बरधराय मनोहराय
त्रैलोक्यनाथ नमिताय नमः शिवाय ॥ ४॥

दक्षप्रजापतिमहामखनाशनाय
क्षिप्रं महात्रिपुरदानवघातनाय ।
ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्तनाय
योगाय योगनमिताय नमः शिवाय ॥ ५॥

संसारसृष्टिघटनापरिवर्तनाय
रक्षः पिशाचगणसिद्धसमाकुलाय ।
सिद्धोरगग्रह गणेन्द्रनिषेविताय
शार्दूल चर्मवसनाय नमः शिवाय ॥ ६॥

भस्माङ्गरागकृतरूपमनोहराय
    सौम्यावदातवनमाश्रितमाश्रिताय ।
गौरीकटाक्षनयनार्ध निरीक्षणाय
    गोक्षीरधारधवलाय नमः शिवाय ॥ ७॥

आदित्यसोमवरुणानिलसेविताय
    यज्ञाग्निहोत्रवरधूमनिकेतनाय ।
ऋक्सामवेदमुनिभिः स्तुतिसंयुताय
    गोपाय गोपनमिताय नमः शिवाय ॥ ८॥

शिवाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

इति श्रीशंकराचार्यकृतं शिवाष्टकं सम्पूर्णम् ।

Encoded and proofread by DPD

---

*shivAShTakam by Adi ShankarAcharya*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*